# Parvata Vardhini Ashtakam or Ramanatheshvari Ashtakam

# પર્વતવર્ધિન્યષ્ટકં અથવા રામનાથેશ્વર્યષ્ટકમ્

## Document Information

Text title : Parvatavardhini AshTakam by Lord Rama

File name : parvatavardhinyaShTakam.itx

Category : devii, pArvatI

Location : doc_devii

Transliterated by : Sivakumar Thyagarajan

Proofread by : PSA Easwaran, Mohan Chettoor

Description/comments : Ramanatheshwarim, Consort of Ramanatha of Rameshwaram

Latest update : September 29, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 29, 2022

*sanskritdocuments.org*

# Parvata Vardhini Ashtakam or Ramanatheshvari Ashtakam

# પર્વતવર્ધિન્યષ્ટકં અથવા રામનાથેશ્વર્યષ્ટકમ્

શ્રીગણેશાય નમઃ ।
સેવ્યાં સાધુજનૈઃ સરોજનયનાં પૂર્ણેન્દુબિમ્બાનનાં
 ઈડ્યામાગમવેદિભિર્મુનિગણૈઃ ધ્યેયાં સદા યોગિભિઃ ।
ધ્યેયાં તુમ્બુરુનારદપ્રભૃતિભિઃ બ્રહ્માદિભિઃ પૂજિતાં
 વન્દે પર્વતવર્ધિતાં સ્મિતમુખીં શ્રીરામનાથેશ્વરીમ્ ॥ ૧॥

ગૌરીં હારકિરીટનૂપરલસત્ખણ્ડેન્દુભૂષાન્વિતાં
 વિદ્યાં વેદશિરોભિરીડ્યમહિમામીશાનદેહાલયામ્ ।
ભક્તાભીષ્ટવરપ્રદાનચતુરાં સંસારસંહારિણીં
 વન્દે પર્વતવર્ધિતાં સ્મિતમુખીં શ્રીરામનાથેશ્વરીમ્ ॥ ૨॥

માયામાત્રવિનોદનિર્મિતજગદ્રક્ષાન્તકૃત્યાન્વિતાં
 સેતૌ સાદરમાગતાખિલજગત્ક્ષેમાય સમ્પ્રસ્થિતામ્ ।
ભક્તાઘૌઘવનાનલોજ્જ્વલશિખાં રાજીવનેત્રદ્વયાં
 વન્દે પર્વતવર્ધિતાં સ્મિતમુખીં શ્રીરામનાથેશ્વરીમ્ ॥ ૩॥

દુર્ગે ગૌરિ ભવાનિ પાર્વતિ શિવે શર્વાણિ રુદ્રપ્રિયે
 માતર્લોકજનન્યભીષ્ટવરદે શૈલેન્દ્રકન્યે ઉમે ।
ચિન્તાતીતપતે ચિરન્તનનુતે ષડ્વક્ત્રલીલારતે
 વન્દે પર્વતવર્ધિતાં સ્મિતમુખીં શ્રીરામનાથેશ્વરીમ્ ॥ ૪॥

ગન્ધર્વામરયક્ષપન્નગવધૂસીમન્તલગ્નાઙ્ઘ્રિકે
 ભક્તાભીષ્ટદકલ્પકાયિતભુજે સંવીક્ષિતેશાનને ।
કણ્ઠેન્દ્વઙ્કિતમસ્તકે ત્રિનયને પિતામ્બરે શ્યામલે
 વન્દે પર્વતવર્ધિતાં સ્મિતમુખીં શ્રીરામનાથેશ્વરીમ્ ॥ ૫॥

ગાયત્ર્યાદિસરિત્સરોદધિતડાકૌઘૈઃ સદા સેવિતાં
 રાજત્કર્ણવિલમ્બિકુણ્ડલમણિશ્રેણિપ્રભારઞ્જિતામ્ ।
ઉત્તુઙ્ગસ્તનમધ્યયુગ્મવિલસદ્ધારાં કરાલાલકાં

વન્દે પર્વતવર્ધિતાં સ્મિતમુખીં શ્રીરામનાથેશ્વરીમ્ ॥ ૬॥

રક્ષોરાજવદૌઘચોદનકૃપાપૂર્ણાવલોકેક્ષણે
સર્વવ્યાકુલતાપશોકશમને સાંરાજ્યસૌભાગ્યદે ।
હત્યાઘૌઘવિનાશનસ્તુતિપદે મૃત્યુઞ્જયાર્દાકૃતે
વન્દે પર્વતવર્ધિતાં સ્મિતમુખીં શ્રીરામનાથેશ્વરીમ્ ॥ ૭॥

ચિત્તાદર્શવિકાસિવર્ષ્મરુચિરામુત્ફુલ્લવક્ત્રામ્બુજાં
વીક્ષાલબ્ધવિરિઞ્ચવિષ્ણુવિભવામાપત્સહાયાઙ્ઘ્રિકામ્ ।
દેવીં દૈવતવૃન્દવન્દિતપદાં દૈત્યેન્દ્રસંહારિણીં
વન્દે પર્વતવર્ધિતાં સ્મિતમુખીં શ્રીરામનાથેશ્વરીમ્ ॥ ૮॥

માતર્હૈમવતીશ્વરિ ત્રિનયને દાક્ષાયણીશપ્રિયે
બાલેન્દ્વઙ્કિતમસ્તકેઽરુણરુચે ષડ્વક્ત્રપીતસ્તને ।
માં રામં જનકાત્મજાં ચ સહજં સુગ્રીવમુખ્યાન્કપીન્
સર્વાન્ ત્રાહિ નમોઽસ્તુ તે ભગવતિ શ્રીરામનાથેશ્વરિમ્ ॥ ૯॥

નમો ગૌર્યૈ પુનર્નમો શિવે રાઘવસન્નુતે ।
નમો ભવાન્યૈ વરદે નમઃ શઙ્કરવલ્લભે ॥ ૧૦॥

ઇતિ શ્રીરાઘવેન પ્રાર્થિતં પર્વતવર્ધિન્યષ્ટકં
અથવા રામનાથેશ્વર્યષ્ટકં સમ્પૂર્ણમ્ ।

ઇતિ શિવમ્ ।

Encoded by Sivakumar Thyagarajan
Proofread by PSA Easwaran, Mohan Chettoor

*Parvata Vardhini Ashtakam or Ramanatheshvari Ashtakam*
pdf was typeset on September 29, 2022

Please send corrections to *sanskrit@cheerful.com*